# ॥ शिव सुप्रभातम् ॥

स्नात्वाजले शीतलितान्तरङ्गाः
     स्पृष्ट्वाचा पुष्पाणिसुवासिताङ्गाः ।
द्विजन्ति प्रभात्त मरुत्तरङ्गाः
     उत्तिष्ठशम्भो तव सुप्रभातम् ॥

नन्दीश्वरांभानिनदंमनोज्ञं
     वर्शाब्दगर्ज्यां इव मन्य मानः ।
केकीकुमारस्य करोतिऽमृतं
     उत्तिष्ठशम्भो तव सुप्रभातम् ॥

लोकैकबन्धुं प्रसविश्यतीति
     प्राचींसमर्च्यान्जलिबद्ध हस्तैः ।
स्तोतुं भवन्तं मुनयः प्रवृत्ताः
     उत्तिष्ठशम्भो तव सुप्रभातम् ॥

ब्रह्मादिदेवोदित वेद मन्त्रैः
     दिग्पालभूषा मणिराणिनादैः ।

कोलाहलोद्गारिच संप्रभूतः
उत्तिष्ठशम्भो तव सुप्रभातम् ॥

आभातिशैलोपरिलम्बमाना
मेघालिरेषागजचर्मनीला ।
नित्येवशाटीहरिनात्वदर्थं
उत्तिष्ठशम्भो तव सुप्रभातम् ॥

प्राथ्यासमन्तात् प्रविकीर्यमाणैः
लिप्तोत्यलोकः शितकान्तिपुञ्जैः ।
धत्तेत्वदीयां रुचिराङ्गशोभां
उत्तिष्ठशम्भो तव सुप्रभातम् ॥